# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 31-08-2025 अङ्काः - 100

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1. अष्टानाम् एकवाक्येन उत्तरं लिखत । 8**

१. भैरवाचार्यः राज्ञे कदा आगत्य स्वमन्त्रसिद्ध्यर्थं सहायं कर्तुं सङ्केतं चकार?

२. भक्तिसुधातरङ्गिणी-ग्रन्थः कैः रचितः?

३. क्षत्रान्तकः कः? सः कस्य पुत्रः?

४. केषाम् अभिषेकसमये मङ्गलकलशजलैरिव दाक्षिण्यं प्रक्षाल्यते?

५. के सुयोधनं सदा न प्रणमन्ति?

६. सिद्धः जनानां रुजः कथं शमयामास?

७. कालिदासेन रचितं नाटकत्रयं किम्?

८. गौतमेन कः निजघ्ने?

९. का रणकालीव ननर्त?

१०. प्रियानाशे किम् अरण्यं भवति?

**2. षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत । 12**

१. जामदग्न्यः विधिवत् उपसन्नं भीष्मं किमित्याशशासे?

२. लवस्य अस्त्रप्रयोगसंहारपाटवं वीक्ष्य रामः किमवोचत्?

३. समुद्रवेला कीदृशी वर्तते?

४. चित्ररथो नाम गन्धर्वराजः पुरूरवसं किमिति व्यजिज्ञपत्?

५. कृतावधेः सुयोधनस्य अभियोगः किं करोति?

६. प्रीतितरहृदया लक्ष्मीः राज्ञे कीदृशं वरमदात्?

७. नीलकण्ठदीक्षितः कः? सः कस्याः उपासकः?

८. अनर्थपरम्परा का? एषाम् एकैकम् अपि केषाम् आयतनम्?

**3. त्रयाणां सप्ताष्टैः वाक्यैः उत्तरं लिखत । 9**

१. "कुमार! तथा प्रयतेथाः" कथम्?

२. युद्धान्निवारयन्तीं मातरं प्रति गाङ्गेयस्य सान्त्ववचनानि कानि?

३. यशोवत्या स्वप्ने किं दृष्टम्? वृत्तान्तं वर्णयत ।

४. रामेण कुमारयोः प्रत्यभिज्ञानं कथं भवति इति वर्णयत ।

५. जीमूतवाहनस्य कारुण्यं वर्णयत ।

**4. वाक्यत्रयं सप्रसङ्गं विवृणुत । 9**

१. अमर्षोऽप्यस्यैव शोभते महावीरस्य ।

२. अये! पुष्पवृष्टिर्दुन्दुभिध्वनिश्च ।

३. कदाचित् प्रमादोऽपि प्रमोदाय कल्पते ।

४. विपदन्ता ह्यविनीतसम्पदः ।

५. शक्त एवाहं स्वयमेव सारथ्यं कर्तुं, प्रहर्तुं च ।

**5. पद्यद्वयं पूर्णं लिखत । 6**

१. कर्मसु .......................... देहि मह्यम् ॥

२. कल्यादौ .......................... देहि मह्यम् ॥

३. बलवान् .......................... शक्तिसम्पदः ॥

**6. एकस्य पद्यस्य सान्वयम् अर्थं लिखत । 4**

१. इत्येकशः प्रतिदिनं विहितव्यवस्थो यान् भक्षयत्यहिपतीनिह पक्षिराजः ।
यास्यन्ति यान्ति च गताश्च दिनैर्विवृद्धिं तेषाममी तुहिनशैलरुचोऽस्थिकूटाः ॥

२. तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत् ।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम् ॥

**7. एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत । 4**

१. लक्ष्मणसूरिः २. बाणभट्टः

**8. चतुर्णां रूपाणि परिचाययत । 4**

१. हर्षनामा २. गिरा ३. उवाच

४. सहसा ५. अशृणोत् ६. पञ्च

**9. चत्वारि पदानि वाक्ये योजयत । 4**

१. तेजस्वी २. भोक्ता ३. देहि

४. त्राये ५. महिष्यः ६. सविधे

**10. चतुर्णां पर्यायपदानि लिखत । 4**

१. प्राचेतसः २. मनुनिवहः ३. सुपर्वलोकः

४. मृगीदृशाम् ५. परित्रायस्व ६. उपजापः

**11. चतुर्णां सन्धिं विभज्य नाम लिखत । 6**

१. वर्षीयांस्तपस्वी २. यस्मिन्नहनि ३. पदेऽहम्

४. कार्यदर्शीत्यभिधीयसे ५. धूर्तैरमानुषोचिताभिः ६. तन्न

**12. चतुर्णाम् एकं पदं लिखत । 4**

१. दशानां रात्रीणां समाहारः २. यस्य कालः न प्राप्तः सः ३. योद्धुम् इच्छा

४. गुरूपदेशं विना ज्ञातानि ५. राज्ञां समूहः ६. शतक्रतोः इयम्

**13. चतुर्णां व्याकरणविशेषं लिखत । 8**

१. अवतिष्ठन्ते २. लोकमधितिष्ठति ३. वाङ्मनसे

४. कुप्यन्ति हितवादिने ५. अलमस्मै कर्मणे ६. सन्तमसम्

**14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत । 8**

१. सूर्याचन्द्रमसौ २. सिद्धवेषधरः ३. सोद्वेगम्

४. राजनीतिनैपुण्यम् ५. उर्वशीगतचित्तः ६. परस्सहस्राः

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत । 6**

१. यतिष्ये २. यापयन्ति ३. अकरोत् ४. विजयस्व

**16. चतुर्णां रिक्तस्थानानि पूरयत ।** **4**

१. ___________ इव अतिरौद्रभूतयः ।

२. अन्यदेवताशून्यम् ___________ त्रैलोक्यम् ।

३. एहि मन्ये गुरुं ___________ ।

४. तरुशाखान्तनिघर्षजः ___________ ।

५. तत्राप्यकरुणे पापे वृथा वः ___________ मयि ।

-------------------------